## कौपिञ्जलहास्तिपदादण् । (१३२/१५१२)

कौपिञ्जलहास्तिपदशब्दाभ्याम् अण् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् विषये । गोत्रवुञोऽपवादः, गोत्राधिकारात् । कौपिञ्जलः । हास्तिपदः ॥

## आथर्वणिकस्येकलोपश्च । (१३३/१५१३)

अण् इत्येव । आथर्वणिकशब्दाद् अण् प्रत्ययो भवति, तत्संनियोगेन च [1]इकलोपः, तस्येदम् इत्येतस्मिन् [2]विषये । चरणवुञोऽपवादः । आथर्वणिकस्यायं आथर्वणो धर्मः आम्नायो वा । 'चरणाद्धर्माम्नाययोः' ( वा. ४७५ ) ॥

## तस्य विकारः । (१३४/१५१४)

तस्य इति षष्ठीसमर्थाद् विकारः इत्येतस्मिन् [3]विषये यथाविहितं प्रत्ययो भवति । प्रकृतेरवस्थान्तरं विकारः । किमिहोदाहरणम् ? अप्राण्याद्युदात्तमवृद्धं, यस्य च नान्यत् [4]प्रतिपदं विधानम् । अश्मनो विकारः आश्मनः, आश्मः ।

[४७८] अश्मनो विकारे ।

इति टिलोपः पाक्षिकः । भास्मनः । मार्त्तिकः । नित्स्वरेणाद्युदात्ता एते । तस्य प्रकरणे तस्य इति पुनर्वचनं शैषिकनिवृत्त्यर्थम् (म. भा. २. ३२१) । विकारावयवयोर्घादयो न भवन्ति[5] । हालः । सैरः ॥

## अवयवे च प्राण्योषधिवृक्षेभ्यः । (१३५/१५१५)

प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः अवयवे यथाविहितं प्रत्ययो भवति, चकाराद् विकारे च । तत्र प्राणिभ्यः अञं वक्ष्यति । कपोतस्य विकारो अवयवो वा कापोतः । मायूरः । तैत्तिरः । [6]ओषधिभ्यः — [7]मौर्वं काण्डम् । [8]मौर्वं भस्म । वृक्षेभ्यः — कारीरं काण्डम् । कारीरं भस्म ।

इत उत्तरे प्रत्ययाः [9]प्राण्योषधिवृक्षेभ्यः विकारावयवयोः भवन्ति[10] । अन्येभ्यस्तु विकारमात्रे । कथं द्वयमप्यधिक्रियते 'तस्य विकारः', 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति ? विकारावयवयोर्युगपदधिकारोऽपवाद–विधानार्थः । कृतनिर्देशौ हि तौ (म.भा. २.३२२) ॥

## बिल्वादिभ्योऽण् । (१३६/१५१६)

बिल्व इत्येवमादिभ्यो[11]ऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः । [12]यथायोगम् अञ्मयटोरपवादः । बिल्वस्य विकारोऽवयवो वा बैल्वः । [13]गवेधुकाशब्दोऽत्र पठ्यते, ततः [14]कोपधात् एव सिद्धे मयड्बाधनार्थं ग्रहणम् ।

बिल्व । व्रीहि । [15]काण्ड । मुद्ग । मसूर । गोधूम । इक्षु । वेणु । [16]गवेधुका । कर्पासी । [17]पाटली । कर्कन्धू । [18]कुटीर । बिल्वादिः ॥

---

1. इकः लोपः ब. इकलोपः भवति फ. 2. अर्थे ह. 3. अर्थे ब. फ. ह. 4. प्रतिपदविधानमस्ति ह. 5. इति इत्यधिकम् ड. 6. औषधिभ्यः ब. 7. दौर्वम् फ, मूर्वाशब्दात् अवयवे प्रत्ययः इत्यधिकम् ड. 8. विकारे इत्यधिकम् ड. 9. प्राण्यौषधि° क.ब. 10. वृक्षशब्देन वनस्पतयोऽपि गृह्यन्ते । न्यग्रोधस्य विकारोऽवयवो वा नैयग्रोधः । पैप्पलः । औदुम्बरः । ओषधिशब्दाद् लतादयोऽपि गृह्यन्ते । ताम्बूल्या विकारोऽवयवो वा ताम्बूलः । गान्दूचः । एभ्यो विकारावयवयोर्भवन्ति इत्यधिकम् क. 11. शब्दादिभ्यः इत्यधिकम् फ. 12. यथायोगम् नास्ति फ. 13. गवेधुका–वेणु इति भागः नास्ति ब, गवेधुकशब्दः क. 14. कोपधत्वात् ड. 15. कुण्ड ड. 16. गवेधुक क, गवेयिका ह. 17. पाटल क. 18. कुयर ड.